धर्मशास्त्र

प्रयोग

मूल शुद्धि

क्र. नं. १३

त्र्यंबकशास्त्री

अं. ८ बारीकर

१३०५

" Joint project of the Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥श्रीगणेशायनमः॥ अथक्षतशुद्धिर्लिख्यते॥सु
मुखश्चेत्यादिसर्वकामादौक्षतशुद्धिप्राणप्रतिष्ठां
तमातृकाबहिर्मातृकान्यासांश्चकरिष्ये॥ इतिसं
कल्प्य येभ्योमाता० एवापित्र इति० ऊर्ध्वकेशीवि
रूपाक्षीमांसशोणितभोजने तिष्ठदेवीशिखाब
धेचामुंडेह्यपराजिते अनेनगायत्र्यावामानस्तोके
त्यनेनवाशिखांबध्वा सहस्राणि० तन्मास्ति बाहु
हृदयंस्पृष्ट्वा उत्पतंतु० ततानिपृथिव्यंतरवासि
नः आसनादौनमस्कृत्य ब्रह्मकर्मसमारभेत्॥
अपसर्पंतुयेभूतायेभूताभुविसंस्थिताः येभू
ताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया अपक्रामंतु

(२)

पृ० १

भूतानिपिशाचाःसर्वतोदिशंसर्वेषामविरोधेन
जपकर्मसमारभेत् ॥ इतिभूमौवामपार्ष्णिघातत्र
यंकृत्वा ॥ तीक्ष्णदंष्ट्रमहाकायकल्पांतदहनोपम
भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ पृथ्वीति
मंत्रस्यमेरुपृष्ठऋषिःकूर्मोदेवता सुतलंछंदः
आसनेविनियोगः ॥ पृथ्वित्वयाधृतालोकादे
वित्वंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकु
रुचासनं ॥ अनंतासनाय० कमलासनाय० विम
लासनाय० योगासनाय० कूर्मासनाय० आधा
रशक्तये० दुष्टविद्रावणनृसिंहाय० मध्येपरम १

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

सुखासना॰ भूर्भुवस्वरो मित्यासने उपविश्य अथ
गुरुं ध्यात्वा स्वशिरसि गुं गुरुभ्यो नमः पं परमगु
रुभ्यो॰ पं परात्पर[illegible] गुरुभ्यो॰ पं परमेष्ठिगुरुभ्यो॰
दक्षिणभुजे गं गणपतये नमः वामभुजे दुं दुर्गा
यै नमः दक्षिणजान्वोः क्षं क्षेत्रपालाय॰ वामजा
न्वोः सं सरस्वत्यै नमः हृदये अं अंतरात्मने नमः
पं परमात्मने॰ सं सर्वात्मने॰ रं रजात्मने॰ तं तमा
त्मने॰ नमोस्त्वनंताय नमोस्तु वेधसे नमो वसि
ष्ठाय नमोस्तु शक्तये पराशराय्याथ नमोस्तु शा
श्वते नमो कृते सत्यवतीसुताय॥ नमो गुरुभ्यो
गुरुपादुकाभ्यो नमः परेभ्यः परपादुकाभ्यः

(3)

श्रृ

२

आचार्यसिद्धेश्वरपादुकाभ्यो नमो स्कलक्ष्मीपति
पादुकाभ्यः नमो महद्भ्य इति नत्वा सर्वेश्वर तनि
वारणाय ज्ञां उं गयस्स ज्ञाराया स्वराज्ञाय सुदर्शना
य हुं फट् स्वाहा उदकस्पर्शः प्राणायामं च कृत्वा
अस्य शरीरस्य आत्मा ऋषिः सत्यो देवता प्र
कृती छंदः मम देहस्य सकलपुरुषार्थसिद्ध्यर्थं
सकलकर्मसु योग्यता सिद्ध्यर्थं देहशुद्धिं करिष्ये
तथाच करशुद्धिं करिष्ये मणिबंधे प्रकोष्ठे च
कूर्परे हस्तसंधिषु तत्पृष्ठपार्श्वयोश्चैव करशु
द्धिरुदाहृता मूलमंत्रेण करशुद्धिं कृत्वा ॥ अ
थ भूतशुद्धिः ब्रह्मकंदसमुद्भूतं ज्ञाननाकं सु २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A) शोभितं ऐश्वर्याष्टदलोपेतं परं वैराग्यकर्णिकं
अधोमुखं तु हृत्पद्मं प्रणवेनोर्ध्वमुन्नयेत्॥ प्रण
वेन विकसितं कृत्वा तत्रस्थं जीवात्मानं हंस मंत्रे
णांकुशमुद्रया सुषुम्ना नाडी मार्गेण ब्रह्मरंध्रं नी
त्वा तत्र सहस्रदलपद्मकर्णिकांतर्गतेन परमात्म
ना सह ऐक्यभावमापादयेत् सोहं जन्मादिदुःख
प्रदं पापपुरुषं विचिंतयेदेवं ब्रह्महत्या शिरस्कं
च स्वर्णस्तेयभुजद्वयं सुरापानहृदा युक्तं गुरुत
ल्पकटिद्वयं तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं त
उपपातकरोमाणं रक्तश्मश्रुविलोचनं अधोमु

(५)

भू॰ खंरक्तवर्णमंगुष्ठपरिमाणकं खड्गचर्मधरंपापं
३ वामकुक्षौविचिंतयेत् इतिपापपुरुषंवामकुक्षौ
विचिंत्य यमितिवायुबीजेनषोडश १६ संख्य
या वामनासापुटेनपूरकेनसंशोष्य रमित्यग्नि
बीजेन चतुःषष्टि ६४ संख्यया कुंभकेनसंद
ह्य पुनर्यमितिवायुबीजेनद्वात्रिंशत्संख्यया ३२
दक्षिणनासापुटेनरेचकेनबहिर्निःसार्य वमि
त्यमृतबीजेनामृती[illegible]त्य लमितिपृथ्वीबीजे
नपिंडीकृत्य हमित्याकाशबीजेनसावकाशंकृ
त्वा ऐंबीजेनपादादिमस्तकांतं सावयवंकृत्वा
अथभूतशुद्धिंकुर्यात् पादादिजानुपर्यंतंपृ ३

(5A)

थ्वीस्थानं चतुरस्त्रं चतुर्दिक्षु वज्रलांछितं तन्म
ध्ये पीतवर्णं लंबीजयुक्तं ध्यायेत् ॥ लंलं लं स्यो
ना पृथिवि का ण्वो मे धातिलिथि भूमि गी यत्री
भूमि ध्याने विनियोगः स्योना पृथिवि रू कू० लं भू
म्यै नमः ॥ जान्वादि नाभिपर्यंतं अपां स्थानं धनुरा
कारं उभमेघः कोटयो श्वेत पयलांछितं तन्मध्ये
श्वेतवर्णं वंबीजयुक्तं ध्यायेत् ॥ वंवं वं अप्सु मे का
ण्वो मे धातिथिरापो गायत्री अप ध्याने वि० अप्सु
मे० वं अद्भ्यो नमः नाभ्यादि हृदपर्यंतं अग्निस्था
नं त्रिकोणं स्वस्तिकलांछितं तन्मध्ये रक्तवर्णं
रंबीजयुक्तं ध्यायेत् ॥ रं रं अग्निं दूतं काण्वो मेधा

(5)

भू० तिथिरग्निर्गायत्री ॥ अग्निध्याने वि० अग्निं दूतं
४ ऋं कूं रं अग्नये नमः हृदयादि भ्रूमध्यपर्यंतं वा
युस्थानं षट्कोणं षाड्विंदुलांछितं तन्मध्ये धूम्रवर्णं
यं बीजसमुक्तं ध्यायेत् ॥ यं इ नववायोव्यपश्चांगिर
सो वायुर्गायत्री ॥ वायुध्याने० नववायऋ कू० यं वा
यवे नमः ॥ भ्रूमध्यादिब्रह्मरंध्रपर्यंतं आकाश
स्थानं वज्राकारे ध्वजलांछितं तन्मध्ये नीलवर्णं
हं बीजसमुक्तं ध्यायेत् ॥ हं इ आदित्यत्नस्यवत्स
आकाशो गायत्री ॥ आकाशध्याने० आदित्यत्न
स्यऋ कू० हं आकाशाय नमः पृथिवी पंचगुणा त
द्वीजेन षडुद्घातप्रयोगेणाप्सु प्रविलापयामि ॥ ४

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5A)

लं ६ चतुर्गुणा आपः ल द्बीजेन पंचोद्घातप्रयोगेणाग्नौ प्रविलापयामि ॥ ॐ वं ५ त्रिगुणं वह्निं तद्बीजेन चतुरुद्घातप्रयोगेण वायौ प्रविलापयामि ॐ रं ४ द्विगुणं वायुं तद्बीजेन त्रिरुद्घातप्रयोगेण आकाशे प्रविलापयामि ॐ यं ३ एकगुणमाकाशं तद्बीजेन द्विरुद्घातप्रयोगेण अहंकारे प्रवि० ॐ हं २ तमहंकारं महत्तत्वे प्रविलापयामि ॥ तन्महत्तत्वं प्रकृतौ प्रविलापयामि तां प्रकृतिं परब्रह्मणि प्रविलापयामि ॥ इति प्रविलाप्य ॥ शुद्धोहं मुक्तोहं सच्चिदानंदरूपोहं ब्रह्माहमस्मीति

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6)

प्रा॰ चिरंभावयेत् ॥ तस्मात्सर्वज्ञात्सर्वशक्तेः परब्रह्मणः
५ सकाशात्प्रकृतिः प्रकृतेर्महान् महतो अहंकारः
अहंकारादाकाशः आकाशाद्वायुः वायोरग्निः
अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः
ओषधीभ्योऽन्नं अन्नाद्रेतः रेतसः पुरुषः स वा
एष पुरुषोऽन्नरसमयः शरीरोत्पत्तिं विभाव्य गेलो
मितिघ्नी भावं संभाव्य स्वशरीरं तेजोमयं पु
रुषार्थसाधनयोग्यं समुत्पन्नामिति भावयि
त्वा इति सृष्ट्वा पुनर्जीवात्मा हंसमंत्रेणानीय
तत्र हृत्कमले प्रतिष्ठाप्य अस्य श्रीप्राणप्रति ५

(6A) ष्टामंत्रस्य ब्रह्माविष्णुमहेश्वराऋषयः ऋग्यजुः
सामाथर्वाणिछंदांसि पराप्राणशक्तिर्देवता
आंबीजं ह्रींशक्तिः क्रोंकिलकं अस्यशरीरस्यप्रा
णप्रतिष्ठार्थेजपेवि० ब्रह्माविष्णुमहेश्वरऋषि
भ्योनमः मूर्ध्नि ऋग्यजुःसामाथर्वाणिछंदां
सिमुखे पराप्राणशक्तिर्देवताहृदये आंबीजं
गुह्ये ह्रींशक्तिःपादयोः क्रोंकिलकंसर्वांगेवि
न्यसामि ॐआंह्रींक्रोंअंकंखंगंघंङं आंक्रों
ह्रींआंॐपृथिव्यप्तेजोवाय्वाकाशात्मनेअंगु
ष्टाभ्यांनमः ॐआं ह्रींक्रोंइंचंछंजंझंञंईक्रों

(०२)

प्रा॰ ह्रीं आं ॐ शब्दस्पर्शरूपरसगंधात्मने तर्जनीभ्यां ॐ
६ आं ह्रीं क्रों उं टं ठं डं ढं णं ऊं क्रों ह्रीं आं ॐ श्रोत्रत्वक्चक्षु
जिह्वाघ्राणात्मने मध्यमाभ्यां ॐ आं ह्रीं क्रों एं तं थं
दं धं नं ऐं क्रों ह्रीं आं [illegible] ॐ वाक्पाणिपादपा
य्पस्थात्मने अनामिकाभ्यां ॐ आं ह्रीं क्रों ओं पं
फं बं भं मं औं क्रों ह्रीं आं ॐ वक्त्व्यादानगमनविसर्गा
नंदात्मने कनिष्ठिकाभ्यां ॐ आं ह्रीं क्रों अं यं रं लं वं
शं षं सं हं क्षं अः क्रों ह्रीं आं ॐ मनोबुध्यहंकारचि
च्चित्तविज्ञानात्मने करतलकरपृष्ठाभ्यां नमः एवं
हृदयादि ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं क्षं हं
सः सोहं अः क्रों ह्रीं आं ॐ मम प्राणा इह प्राणाः ॐ
आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं क्षं हं सः सोहं अः क्रों ६

...Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(07A)

ह्रींआंॐममजीवइहस्थितःॐआंह्रींक्रोंअंयंरंलं
वंशंषंसंहंक्षंहंसःसोहंअःक्रोंह्रींआंॐममसर्वेंद्रि
याणिवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहाग
त्यसुखंचिरंतिष्ठंतुस्वाहा असुनीतेपुनरस्मासु चत्वा
रिवाक् गर्भाधानादिपंचदशसंस्कारार्थंपंचदशप्र
णवावृत्तिभिःकरिष्ये ॐ १५ अथध्यानं रक्तांभोधि
स्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैःपाशं
कोदंडमिक्षूद्भवमथगुणमप्यंकुशंपंचबाणान् बि
भ्राणासृक्कपालंत्रिनयनलसितापीनवक्षोरुहाढ्या
देवीबालार्कवर्णाभवतुसुखकरीप्राणशक्तिःपरानः
अथांतर्मातृकान्यासमंत्रस्यब्रह्माऋषिःगायत्रीछं

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8)

सू० ७

दः मातृकासरस्वती देवता हलो बीजानि स्वराः शक्त
यः बिंदुः किलकं मातृकान्यासे विनियोगः ब्रह्मणे ऋ
षये नमः शिरसि गायत्री छंदसे नमः मुखे मातृका
सरस्वती देवतायै नमः हृदये हलो बीजाय नमः गुह्ये
स्वराः शक्तये नमः पादयोः बिंदुः किलकं सर्वांगे
ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां० ॐ इं चं ५ ईं त
र्जनीभ्यां० ॐ उं टं ५ ऊं मध्यमाभ्यां० ॐ एं तं ५ ऐं अ
नामिकाभ्यां० ॐ ओं पं ५ औं कनिष्ठिकाभ्यां० ॐ अं
यं रं लं वं शं षं सं हं क्षं अः करतलकरपृष्ठाभ्यां नमः एवं
हृदयादि हंसः सोहं ॐ अं नमः ॐ आं नमः० १६
अः नमः एतान्षोडशस्वरान् कंठस्थाने षोडशा द ७

(08A)

लेविन्यस्यामि ॐकंनमः खंनमः १२ ठंनमः एतान्द्वाद
शवर्णान्हृदयस्थानेद्वादशदलेविन्यसामि ॐडंन
म० फंनमः एतान्दशवर्णान् नाभिस्थानेदशदले
विन्यसामि ॐबंनमः० लंनमः ६ एतान्षड्वर्णान्
लिंगस्थानेषड्दलेविन्यसामि ॐवंॐशं० ॐषं०
सं नमः एतान् चतुर्वर्णान् आधारस्थानेचतुर्दले
वि० ॐहं० क्षं० वर्णौ भ्रूमध्यस्थानेद्विदलेविन्यसा
मि आधारेलिंग० बंध० काशां० २ ॐअंआंइं
ईंउंऊं० स्वरैः पूरकः वं० कुंभकः यं० रेचकः जपि
त्वा प्राणायामंकृत्वा ॥ ॥ अस्यश्री बहिर्मातृका
सरस्वतीन्यासमंत्रस्य ब्रह्माऋषिः बहिर्मातृका

joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(१)

१५·
८

सरस्वती देवता हलो बीजानि स्वराः शक्तयः बिं
दुः किलकं बहिर्मीत कान्यासे वि० ब्रह्मणे ऋषये
नमः शिरसि पंक्तिछंदसे नमः मुखे बहिर्मीतका
सरस्वती देवता येनमः हृदये हलो बीजायनमः
गुह्ये स्वराः शक्तये नमः पादयोः बिंदुः किलकं स
र्वांगे ॐ अं कं ५ आं अंगुष्ठाभ्यां० ॐ इं चं ५ ईं त
र्जनीभ्यां० ॐ उं टं ५ ऊं मध्यमाभ्यां० ॐ एं तं ५ ऐं
अनामिकाभ्यां० ॐ ओं पं ५ औं कनिष्ठिका० ॐ
अं यं ९ अः करतलकरपृष्ठाभ्यां० एवं हृदयादि॥
ॐ अं नमः शिरसि ॐ आं आननवृत्ते ॐ इं
नमः दक्षिणनेत्रे ॐ ईं नमः वामनेत्रे ॐ उं नमः ८

Joint project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai

(9A)

दक्षिणकर्णे ॐ ऊं नमः वामकर्णे ॐ ॠं नमः दक्षिण
नासापुटे ॐ ॠं नमः वामनासापुटे ॐ ॡं नमः
दक्षिणगंडे ॐ ॡं नमः वामगंडे ॐ एं नमः ऊर्ध्वो
ष्ठे ॐ ऐं नमः अधरोष्ठे ॐ ओं नमः ऊर्ध्वदंतपं
क्तौ ॐ औं नमः अधरदंतपंक्तौ ॐ अं नमः मू
र्ध्नि ॐ अः नमः मुखे ॐ कं नमः दक्षिणबाहुमू
ले ॐ खं० ॥ कूर्परे ॐ गं० मणिबंधे ॐ घं० अं
गुलिमूले ॐ ङं० अंगुल्यग्रेषु ॐ चं० मवा स्कंधे
बाहुमूले ॐ छं० कूर्परे ॐ जं० मणिबंधे ॐ झं०
अंगुलिमूले ॐ ञं० अंगुल्यग्रेषु ॐ टं० ठं० डं०
ढं० णं० एतान्पंचवर्णान् दक्षिणपार्श्वयोः पाद
संध्यग्रेषु ॐ तं० थं० दं० धं० नं० एतान्पंचवर्णान्वा

(१०)

१६० मपार्श्वपादसंध्यग्रेषु ॐ पं० फं० बं० भं० मं० एता
८ न्यंचवर्णान्पार्श्वद्वयपृष्ठनाभ्युदरेषु ॐ यं त्वगा
त्मने हृदये ॐ रं० असृगात्मने बाहुमूलद्वये ॐ
लं० मांसात्मने ककुदि द्वये ॐ वं० मेदात्मने कक्ष
द्वयमूले ॐ शं० अ[illegible]ात्मने हृदयादिहस्त
युगुलपर्यंतं ॐ षं नमः मज्जात्मने हृदयादिपा
दयुगुलपर्यंतं ॐ सं० शुक्रात्मने हृदयादिजठर
पर्यंतं ॐ हं प्राणात्मने हृदयादिमुखपर्यंतं ॐ
क्षं नमः जीवात्मने हृत्स्थ वां त्रिरा[illegible]पर्यंतं विन्य
सामि॥ अथ ध्यानं॥ पंचाशद्वर्णभेदैर्विहित
वदनदोःपादहृत्कुक्षिवक्षोदेशां भास्वत्कपर्दा
कलितशशिकलामिंदुकुंदावदातां॥ अक्षस्र ९

१२० कुंभवीणालिखितवरकरां त्र्यक्षणां पद्मसंस्था
१० मच्छाकल्यामतुच्छस्तनजघनभरां भारतीं तां न
मामि ॥१॥ ॐ अं आं० स्वरैः पूरकः ॐ कं खं०
(10A) कुंभकः यं रं० रेचकः आपित्वा प्राणायामः ॥ अ
थकारिका ॥ ॥ शिरोवदनवृत्तेपि चक्षुःश्रोत्रयु
गे तथा नासाकपोलयुगले चोर्ध्वोष्ठाधरयोर
पि १ ऊर्ध्वाधोदंतपंक्तौ च मूर्ध्न्यास्ये षोडशस्वरा
न् कचवर्गद्वयं बाह्वोः पंचसंधिस्थले न्यसेत्
पवर्गं पार्श्वयुगले पृष्ठे नाभ्युदरेषु च ॥ हृदोर्मू
ल ककुप्कक्षे हृदादिकरपद्वये ॥२॥ जठरान
नयोश्चैव व्यापकं विनियोजयेत् ॥ इति भरतशु १०
द्धिसमाप्तं ॥ ॥श्रीगजाननप्रसंन्न ॥ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(11)

॥ इति भ्रतशुश्रुस्व समाप्तः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com